मुद्रित पृष्ठ : 3 अनुक्रमांक ......................

**शा/सेमे II/101**

# शास्त्री ( ऑनर्स ) ( द्वितीय सेमेस्टर ) परीक्षा, 2014-15

## धर्मागम

## VDV-121

***समयः* - *घंटात्रयम्*** ***पूर्णाङ्काः – 70***

***( प्रश्नपत्रप्राप्तिसमनन्तरमेव अस्योपरि स्वीयोऽनुक्रमाङ्कः लेख्यः )***

**1.** अधोलिखितेषु **त्रयो** मन्त्रा व्याख्यायन्ताम्– 45

(क) सहस्रशीर्षा पुरुष: सहस्राक्ष: सहस्रपात् ।
स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ।।

(ख) हिरण्यगर्भ: समवर्तताग्रे
भूतस्य जात: पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम ।।

(ग) यस्यां समुद्र उत सिन्धुरापो
यस्यामन्नं कृष्टय: संबभूवु: ।
यस्यामिदं जिन्वति प्राणदेजत्
सा नो भूमि: पूर्वपेवे दधातु ।।

(घ) समानी व आकूति: समाना हृदयानि व: ।
समानमस्तु वो मनो यथा व:सुसहासति ।।

(ङ) मा नो हिंसीज्जनिता य: पृथिव्या
यो वा दिवं सत्यधर्मा जजान ।
यश्चाप्श्चन्द्रा बृहतीर्जजान
कस्मै देवाय हविषा विधेम ।।

(च) अहं रुद्रेभिर्वसुभिश्चरामि
अहमादित्यैरुत विश्वदेवै: ।
अहं मित्रावरुणोमा बिभर्म्य-
हमिन्द्राग्न्वी अहमश्विनोभा ।।

**2.** पुरुषस्वरुपं वा हिरण्यगर्भस्वरुपं वा ऋग्वेदानुसारेणनिरुप्यताम् । 10





**3.** अद्यस्तनेषु पञ्चसु व्याकरणात्मिका टिप्पणी लिख्यन्ताम्– 05

अवर्तत, दाधार, हिंसीत्, जजान, विधेम, विभर्मि, जज्ञिरे, ईशान, प्रथताम्, ईशे ।

**4.** अतिसंक्षिप्तमुत्तरं लिखत–

(क) पुरुषसूक्तं ऋग्वेदस्य कस्मिन् मण्डले विद्यते ?

(ख) पृथिवीसूक्तं अथर्ववेदस्य कस्मिन् काण्डे वर्तते ?

(ग) ऋग्वेदस्य प्रथमो मन्त्र:कस्य देवस्य विषये अस्ति ?

(घ) ऋग्वेदे सर्वाधिकेन सूक्तेन को देव: स्तुत: ?

(ङ) विराट् कस्मात् अजायत ?



300